
# भारतीय संस्कृति में निरूपित जीवन-मूल्य एवं मानवाधिकार

सम्पादक

**प्रो. यादराम मीणा**



# वैदिकवाङ्मये निरूपितं जीवनमूल्यम्

✍ जानकीशरण
*अधिष्ठाता–दर्शनसङ्कायस्य एवं सहायकाचार्यः (दर्शनम्)*
*श्री सोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्*

## किञ्चित् प्रास्ताविकम्–

अस्यां पृथिव्यां यद्यस्ति कश्चन भूभागः यः खलु "पुण्यभूमिः" इति ख्यातेः प्राप्तौ स्वाधिकारं प्रकटयितुं समर्थः, यद्यस्ति कश्चन भूभागः यं खलु पृथिव्यां विद्यमानाः सर्वे प्राणिनः स्वस्वकर्मविपाकार्थम् अवश्यमेव प्राप्नुयुः, यद्यस्ति कश्चन भूभागः यत्र खलु सर्वेश्वरं भगवन्तं प्रति उन्मुखीभवितुं प्रयतमानः प्रत्येकमपि जीवः सर्वान्तिप्रस्थानरूपेण अवश्यम् आगच्छेत्, यद्यस्ति कश्चन भूभागाः यत्र मानवसमुदायः मानवतायाः उदारतायाः, पवित्रतायाः, प्रत्याहारस्य, जीवनमूल्यस्य, मानवाधिकारस्य, सर्वोपरि अन्तर्वीक्षायाः आध्यात्मिकतायाश्च सर्वोच्चशिखरम् अधिरूढः आसीत्, तर्हि स भूभागो निश्चितं भारतमेव भवति। सर्वप्रथमम् अत्रैव मानवस्य स्वस्वरूपं प्रति जैवीयान्तर्जगत्प्रति च सुनिश्चिता अन्वेषणा प्रादुर्भूतासीत्।[1]

अस्माकम् अयं भारतदेशः धर्मस्य दर्शनस्य च भूमिरस्ति। महीयसाम् आध्यात्मिकगुरुणां जन्मभूमिरस्ति। अस्यामेव पुण्यभूमौ आ अत्यन्तप्राचीनकालात् आ च अभिनवकालं, जीवनस्य सर्वोत्तमादर्शाः प्रत्येकमानवं प्रति उन्मुक्ताः आसन्। एतद् भारतं यत् शतशः अब्दानां कालतः सञ्जनितानां विविधनाम् आघातानां प्रभावम्, असङ्ख्यानां वैदेशिकानाम् आक्रमणजनितान् क्लेशान्, शतशः आचारव्यवहारविषयकसङ्घर्षाणां दुष्परिणामान् सर्वानपि सोढ्वा अद्यापि अक्षयताम् आधत्ते। यदा वयं समग्रस्य विश्वस्य इतिहासं पठामः तदा वयं स्वयमवगच्छामः यत् प्रपञ्चे यत्र कुत्रापि कोणे परिलक्षितस्य उत्तमोत्तमजीवनादर्शस्य मूलं भारते एव अस्ति। स्मृतेः अतीतात् कालादारभ्य भारतं बहुमूल्यानां मानवीयसमाजविषयिकाणां भावनानां खनिरासीत्। एकोऽपि तादृशः देशः नास्ति यस्य कोऽपि उत्तमसदाचारनियमः अंशतः वा सम्पूर्णम् अस्माकं सकाशात् न गृहीतः स्यात्। अतः समग्रोऽपि प्रपञ्चः अस्माकं मातृभूम्यै सुमहद् ऋणं वहति।

## भारतस्य जीवनकेन्द्रम्–

बहो कालादारभ्य बहुविधाघातान् सोढ्वापि राष्ट्रमिदं सुस्थिर वर्तते। आध्यात्मिकक्षेत्रे इदानीमपि इतरराष्ट्राणां नेतृत्वं करोति। किमस्ति तत्र कारणमिति विचारयामश्चेत् अस्य प्रश्नस्य एकमेव उत्तरमस्ति यत् अस्माकं राष्ट्रस्य जीवातुभूतं केन्द्रं भवति–धर्मः। भारते तावत् धार्मिकजीवनमेव केन्द्रं भवति। अयं हि राष्ट्रियजीवनमहासङ्गीतकस्य प्रधानस्वरभूतोऽस्ति-धर्मः।[12] स च धर्म भारतस्य स्वाभाविकी शक्तिरस्ति, भारतस्य जीवनशक्तिरस्ति। अतः यदि किमपि राष्ट्रं स्वीयां स्वाभाविकीं जीवनशक्तिं त्यक्तुं प्रयतेत, यया शक्त्या सहस्रेभ्यो वर्षेभ्यः तस्य राष्ट्रस्य कृते दिशानिर्देशनं कृतम्, यदि च तादृशप्रयत्ने तद् राष्ट्रं सफलं भवेत्, तर्हि अचिरादेव तद् राष्ट्रं नश्यति। अयं हि धर्मः मानवस्य आध्यात्मिकोन्नतेः कारणमस्ति। विषयेऽस्मिन् वयं स्वामिविवेकानन्दस्य उद्धरणमत्र स्मरामः। एतस्य भारतराष्ट्रस्य आ सहस्रशताब्दीभ्यः अस्तित्वकारणविषये स्वामिपादाः वदन्ति यत् "भारतस्य अस्तित्वस्य एकमात्रहेतुः भवति मानवजातेः आध्यात्मिकीकरणम्। एतदेव तस्य आजीवनकार्यस्य प्रतिपाद्यं वस्तु। एतदेव तस्य नित्यशाश्वतसङ्गीतस्य उद्देश्यम्। एतदेव तस्य अस्तित्वस्य मेरुदण्डः। एतदेव तस्य जीवनस्य आधारशिला च वर्तते। भवतु नाम शासनं यस्याः कस्या अपितातारजातेः अथवा तुर्कजातेः, मुगलजातेः अथवा आङ्ग्लजातेः–भारतं स्वस्य जीवनसरणे ईषदपि इतस्ततः न प्राचलत्"।[3]

## वैदिकवाङ्मये जीवनमूल्यानि–

अयमेव धर्मः अस्माकं जीवनमूल्यानां कारणमस्ति। स च धर्मः वेदोपदिष्टः। "**ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्**[4]" इत्यादिश्रुतयः, "**पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्**[5]" इत्यादिस्मृतयश्च भूतभवद्भविष्यदर्थसाधको वेद एव भारतीयानामनर्घ्यः अक्षयश्च शेवधिरिति बाभाषन्ते। कर्मोपासनज्ञानकाण्डादिरूपेण विभक्तोऽयमाम्नायः प्राणिमात्रस्य अभुदयनिःश्रेयससाधको वर्तते। वेदो वै विगलितविभेदो निरस्ताशेषभ्रमप्रमादविप्रलिप्साकरणा-पाटावादिपुंदोषशङ्कापङ्ककलङ्कावकाशो विलसितभगवल्लीलाविलासः सच्चिदानन्द-ब्रह्मणो निश्श्वासभूतो निखिलतार्किकविपश्चिदपश्चिममनस्विमानिता मान्यतासम्प्राप्तो वर्तते।

**धार्मिकमूल्यम**–अस्मिन् वेदे वेदानुसारिवैदिकवाङ्मये च भारतीयसंस्कृतेः प्राणभूतानि जीवन्मूल्यानि निहितानि वर्तन्ते। वैदिकवाङ्मयस्य इदमेव वैशिष्ट्यं यदत्र कस्यचिद् वर्णविशेषस्य जातिविशेषस्य वा उन्नतेः कामना न कृता, प्रत्युत प्राणिमात्रस्य कल्याणभावनाऽत्र निहिता वर्तते। लोके इदं अवलोक्यते यत् परस्परद्वेषकारणात् कलहो जायते। अस्मत्सु परस्परं द्वेषो न स्यात् तदर्थं वेदाः "**मा विद्विषावहै**[6]" इत्युपदिशन्ति। ते हि मानवमात्रं "**मनुर्भवः**[7]" इति आदिशन्ति। ये श्रेष्ठगुणास्सन्ति, यानि पुण्यकर्माणि सन्ति, ये चानुपालनीया नियमास्सन्ति, स्वकीयजीवने उन्नत्यर्थं ते सर्वे गुणाः अस्माभिः धारणीया वर्तन्ते। व्यक्तेः निर्माणेन परिवारस्य निर्माणं भवति, परिवारनिर्माणेन समाजस्य उन्नतिर्भवति। उत्तमसमाजो हि राष्ट्रस्य कारणं भवति। अत एव वेदेषु व्यक्तिविशेषस्य कल्याणस्य कामनां न कृत्वा समग्रविश्वसमा-

जस्य कल्याणभावना दरीदृश्यते। यजुर्वेदे हि उक्तम् "**मित्रस्य चक्षुषा समीक्षामहे**[8]" इति। सर्वत्र मैत्रीभावना स्यात्। सर्वासु दिक्षु उपदिशु च सर्वे प्राणिनः मम मित्राणि स्युः।[9] अस्माकं व्यवहारः द्वेषकपटहिंसादिरहितस्स्यात्, सर्वे परस्परं मैत्रीभावनापुरस्सरं व्यवहरेयुरिति वेदाः प्रवदन्ति।[10] वैदिकवाङ्मये यानि जीवनमूल्यानि निहितानि सन्ति तानि अस्माकं संस्कृतेः आधारभूतानि सन्तीति पूर्वमुक्तम्। तस्मात् कारणादेव वैदिकवाङ्मये मनुष्येषु जातिः अथवा वर्णाधारेण भेदभावो न दृश्यते। समग्रोऽपि विश्वः अत्र एकीभवति। यथोक्तं "**यत्र विश्वं भवत्यैकनीडम्**[11]"इति। "**शृण्वन्तु विश्वे अमृतस्य पुत्राः**[12]" इति वेदघोषः अस्मान् सर्वान् पृथक् पृथक् अविभज्य अमृतपुत्रत्वेन कल्पयति। स्वजीवने सर्वाङ्गीणविकासाय मनुष्यः सर्वदा चिन्तनं मननं प्रयत्नञ्च कुर्यादिति वेदो वक्ति–"**उद्यानं ते पुरुष नावयानम्**[13]"इति।

**सामाजिकमूल्यम्**–वैदिकी समाजव्यवस्था सर्वदैव "सर्वभूतेहितेरताः", "वसुधैव कुटुम्बकम्", "सर्वजनसुखाय सर्वजनहिताय" इति प्रेरणया प्रेरिताऽस्ति।

वैदिकवाङ्मये समाजव्यवस्थायाः कल्पना एकेन शरीरधारिपुरुषरूपेण कृता वर्तते। यथाऽस्माकं शरीरे सर्वाणि अङ्गानि महत्त्वपूर्णानि सन्ति, उत्कृष्टानि च सन्ति। न हि किञ्चित् अङ्गम् अन्यस्माद् अङ्गाद्धीनमस्ति। तथैव पुरुषकल्पे समाजेऽपि ब्राह्मणादिचत्वारो वर्णाः समाजस्य आधारभूतास्सन्ति।[14] यथा शरीरे सर्वैरङ्गैः सम्भूय शरीरपिञ्जरचालनकर्म क्रियते तथैव चतुर्भिः वर्णैः समाजसञ्चालनस्य कर्म सम्भूय एव कर्तुं शक्यते। अनेन इदमपि ज्ञायते यत् वैदिकसमाजे वर्णव्यवस्थायाः आधारः गुणकर्मे स्तः, न तु जाति। वेदस्य एतदेव आशयः श्रीभगवता भगवद्गीतायामपि अनेक श्लोकेन निगदितम्–

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**
**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥**[15] इति।

वैदिकवाङ्मये अधिकांशतः प्रार्थनामन्त्रेषु बहुवचनस्य प्रयोगो दृश्यते। तथा हि "**धियो यो नः प्रचोदयात्**[16]", "**यद् भद्रं तन्न आसुव**[17]", **अग्ने नय सुपथा राये अस्मान्** [18]", "**समानी प्रपा सह वोऽन्नभागः**[19]"इति। अनेन इदं द्योत्यते यत् वेदः व्यष्टिगतविचारापेक्षया समष्टिगतविचारसरणीं बिभर्ति। इयं हि समष्टिगतविचारसरणिः, कस्यापि समाजस्य उन्नत्यर्थम् अनिवार्याऽस्ति। ऋग्वेदसंहितायाः एका विलक्षण ऋक् अत्र स्मरणीया वर्तते–

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥**[20]"इति।

इयं ऋक् वदति यत् भवन्तः सर्वे एकमनस्काः भवन्तु। सर्वे समानविचारवन्तः भवन्तु। यतः पुरा काले एकमनस्काः भूताः इतिहेतोः एव देवताः आहुतीः प्राप्नुवन्। अतः एकमनस्कतासम्पादनमेव समाजरचनायाः रहस्यम्।

अपि च वैदिकवाङ्मये कस्यचिद् एकस्य वर्णस्य उन्नतेः कामना न वर्तते, किन्तु चतुर्णां वर्णानाम् उन्नतिः यथा स्यात् तदर्थं परमात्मानं प्रति प्रार्थना कृता वर्तते। यथा हि श्रूयते–

**रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि।**
**रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम्।।**[21] ।इति।

"**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषवयोऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्**[22]" इति।

**नैतिकमूल्यम्**–वैदिकवाङ्मये नैतिकमूल्यानामपि अवधारणा दृग्गोचरी भवति। समग्रमानवसमाजे न कश्चिद् निर्धनस्स्यात्, न कश्चन निर्बलस्स्यात्। सर्वेभ्यः स्वजीवने उन्नत्यर्थं समानावसरः स्यात्, तदर्थं वेदः प्रत्येकं मानवं "**तेन त्यक्तेन भुञ्जीथाः**[23]" इत्युपदेशेन प्रचोदयति। त्यागपूर्वकं, दानपूर्वकं च समेषां पदार्थानां भोगकरणम् भारतीया संस्कृतिः। यस्तु जनः वस्तुनि इतरेभ्यः अदत्त्वा आत्मार्थं भुङ्क्ते अथवा तेषां पदार्थानां विषये स्वभोगार्थमेव चिन्तयति, सः जनः इतरेषां जनानां पापं भुङ्क्ते इति श्रुतिरस्मान् उपदशिति–"**केवलाघो भवति केवलादी**[24]"इति। परमात्मना सर्वेऽपि पदार्थाः सर्वेभ्यः दत्ताः सन्ति, स एव सर्वेषु अन्तर्यामिरूपेण अपि विराजते[25]। यदि कस्मिँश्चित् समाजे केचन अत्यधिकाढ्याः सन्ति, केचन चात्यन्तनिर्धनाः, केषाञ्चित् सविधे भुक्त्यर्थं बह्वन्नं वर्तते, किन्तु तस्मिन्नेव समाजे कश्चिज्जनः बुभुक्षुरूपेण शेते, तर्हि सः समाजः सुन्दर इति वक्तुं न शक्यते। अतः एव वेदः अमुं भेदं निवारयितुं नैतिकमूल्यान्यपि अस्मान् शिक्षयति। तानि हि नैतिकमूल्यानि अस्माभिः अनुपालनीयानि भवन्ति।

समाजे सर्वेषां यथाकर्म समानं महत्त्वमस्ति। समाजे ये केऽपि कर्मकराः सन्ति, तेऽपि समाजस्य महत्त्वपूर्णानि अङ्गानि सन्ति। अतः तैस्सह अपि सम्मानस्य व्यवहारः करणीयः। वेदे तावत् तक्षक–रथनिर्मातृ–कुम्भकार–निषादेत्यादीनां कृतेऽपि नमस्कारपूर्वकं प्रशंसा श्रूयते–"**नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः**[26]"इति।

उपसंहाररूपेण वयं वक्तुं शक्नुमः यत् वैदिकवाङ्मयनिहितानि जीवनमूल्यानि भारतीयसंस्कृतेः प्राणाः सन्ति। एभिः हि जीवनमूल्यैः अस्माकं संस्कृतिः चिरकालात् अक्षुण्णा वर्तते, सुप्रतिष्ठिता च रराज्यते। इयं हि सर्वत्र समभावं स्तौति, आध्यात्मिकतां च प्रसार्य मानवम् आत्मज्ञानार्थं प्रति नयतीति शम्।

## सन्दर्भ :


1. द्रष्टव्यम्–स्वामिविवेकानन्दसाहित्यम्, 5:5
2. द्रष्टव्यम्–स्वामिविवेकानन्दसाहित्यम्, 5:115
3. स्वामिविवेकानन्दसाहित्यम्, 9:300
4. तैत्तिरीयब्राह्मणम्, 1.2.1.6
5. मनुस्मृतिः, 12.94
6. कठोपनिषदः शान्तिपाठः

7. ऋग्वेदः, 10.53.6
8. यजुर्वेदः, 36, 18
9. "सर्वा आशा मम मित्रं भवन्तु"–अथर्ववेदः, 19.15.6
10. "मा नो द्विक्षत कश्चन"–अथर्ववेदः, 36.18
11. महानारायणोपनिषद्, 2.14
12. ऋग्वेदः, 10.13.1
13. अथर्ववेदः, 8.1.6
14. "ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत", ऋग्वेदः, 10.90.12
15. भगवद्गीता, 4.13
16. यजुर्वेदः, 4.06
17. यजुर्वेदः, 30.3
18. यजुर्वेदः, 40.6
19. ऋग्वेदेः, 10.191.2
20. अथर्ववेदः, 3.30.6
21. यजुर्वेदः, 18.48
22. वाजसनेयिमाध्यन्दनीयशाखीयः यजुर्वेदः, 22.22
23. ईशोपनिषद्, 2
24. ऋग्वेदः, 10.117.6
25. "ईशावास्यमिदं सर्वम्", ईशोपनिषद्, 1
26. यजुर्वेदः, 16.27 ❑